# Tritattvalakini Stavanam

# ત્રિતત્ત્વલાકિનીસ્તવનમ્

## Document Information

Text title : Tritattvalakini Stavanam

File name : tritattvalAkinIstavanam.itx

Category : devii, ShaTchakrashakti, devI

Location : doc_devii

Transliterated by : staff of Muktabodha.org Mark S.G. Dyczkowski

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : rudrayAmale uttaratantre 1 bhairava bhairavI sa.nvAde

Source : Rudrayamalam part 1 edited by Ram Prasad Tripathi and Sudhakar Malaviya

Acknowledge-Permission: Marjorie Woollacott, Ph.D., Digital Library Coordinator muktabodha.org

Latest update : February 16, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 16, 2020

*sanskritdocuments.org*

# ત્રિતત્ત્વલાકિનીસ્તવનમ્

શિવાં શક્ત્યામાદ્યાં દશદલગતાં રુદ્રમહિષીં
વિશાલાક્ષીં સૂક્ષ્માં શશિયુતજટાજૂટમુકુટામ્ ।
મહાવિદ્યુત્કોટિપ્રિયજડિતપીઠે ત્રિનયનાં
મહાલાકિન્યાખ્યાં દશદલ કલાં ભાવયતિ કઃ ॥ ૪૪-૨૫॥

મૃણાલાન્તર્ધ્વાન્તઃ પ્રકટતટસંહારસુભગાં
કુલક્ષેત્રોલ્લાસાં ચરમપદદાં દીપકલિકામ્ ।
સદાનન્દાકારાં ગતિગુણહરાં ચારુકિરણાં
પ્રભાવર્ણશ્યામાં રુચિરવદનાં ભાવયતિ કઃ ॥ ૪૪-૨૬॥

પ્રતીક્ષાનન્દાબ્ધિં પ્રકટચરણામ્ભોજયુગલાં
વિયદ્વર્ણાં કાન્તાં સુરવરસુપૂજાવિધિરતામ્ ।
મહાસૂક્ષ્મદ્વારપ્રચલનકરીં ભેદનકરીં
દિવાયોગાહ્લાદપ્રિયજનશિવાં ભાવયતિ કઃ ॥ ૪૪-૨૭॥

અયોધ્યાપીઠસ્થામરુણકમનીં પ્રેમગલિતાં
મહારૌદ્રીં ભીમાં શતશતરવિપ્રેમનિકરામ્ ।
મહાદુઃખાર્તાનાં નયનશુભગાં ભાવવિરહાં
સતીં સીતામિન્દ્રોત્સવનવઘટાં ભાવયતિ કઃ ॥ ૪૪-૨૮॥

સુધાબ્ધેરાહ્લાદપ્રકરણસુરાં સૌરભકરાં
ક્રિયારૂપાં યોગ્યાં ભુવમણિપૂરપ્રકૃતિગામ્ ।
ગુરોઃ સ્થાનોદ્યોગાં સમનદહનાં શીતલવરાં
ત્રિતત્ત્વાં તત્ત્વજ્ઞાં સ(શ)મરહરશક્તિં ભજતિ કઃ ॥ ૪૪-૨૯॥

વિકારાકારાઙ્ગીં તરુણરવિકોટિશ્રિયમિમાં
કુલાધારાં સારાં પરમરસધારાં જયવરામ્ ।
કૃપાચ્છન્નાકામાં પરમરસભાણ્ડેષુ શુભદાં
ભજેદિન્દ્રાં રુદ્રાં શશિમુખકરાહ્લાદનિકરામ્ ॥ ૪૪-૩૦॥

રસાબ્ધૌ વિશ્રાન્તિં કુપિતજનશાન્તિં સકરુણાં
ત્રિલોકજ્ઞાનસ્થાં મદનનિલયાં યોગનિકરામ્ ।
મણિદ્વીપચ્છાયાં દશદલકલાં કેવલભવાં
ભવાનીં રુદ્રાણીં વરદમણિપૂરે ભજતિ કઃ ॥ ૪૪-૩૧॥

કૃપાબ્ધૌ કિં કિં કિમનુગતસુતાં મૌલિનમિતાં
શિવાઙ્કાં મૂલસ્થાં સકલમણિપૂરસ્થિરભવામ્ ।
હિરણ્યાક્ષીં તક્ષાં ક્ષયકરણરશ્મિચ્છવિશતાં
વિનોદીં પઞ્ચાસ્યપ્રિયગુણધરાં ભાવયતિ કઃ ॥ ૪૪-૩૨॥

મહાપદ્માખ્યાં સકલધનદાનાકુલચલાં
ચલાનન્દોદ્રેકપ્રચયરસસિન્ધૂદ્ભવહૃદિ ।
હૃદાનન્દો ધ્યાયેત્ સકલગુણદાત્રીં સુખમયીં
કલાં સૂક્ષ્માત્યન્તાં તિમિરદહનાં કોટિધનદામ્ ॥ ૪૪-૩૩॥

દશકં યઃ પઠેન્નિત્યં શ્રીવિદ્યાં સુખદાયિનીમ્ ।
ધ્યાત્વા હૃદયપદ્માધો નિર્મલાત્મા સદા પઠેત્ ॥ ૪૪-૩૪॥

મણિપૂરસ્થિતં દેવં રુદ્રં પશ્યતિ યોગિરાટ્ ।
રુદ્રાણીસહિતં શમ્ભું દૃષ્ટ્વા મુક્તો ભવેત્ ક્ષણાત્ ॥ ૪૪-૩૫॥

જીવન્મુક્તઃ સ એવાત્મા યોગિનીવલ્લભો ભવેત્ ।
યોગાત્મા પરમાત્મા ચ સ હિ સાક્ષાદનીશ્વરઃ ॥ ૪૪-૩૬॥

સ ભિત્વા મણિ પૂરાબ્ધિં નિર્મલં જ્યોતિરુજ્જ્વલમ્ ।
શમ્ભોરીશ્વરયોગજ્ઞક્રિયાનાથસ્ય શ્રીપતેઃ ॥ ૪૪-૩૭॥

નિકટે યાતિ દેવ્યાશ્ચ સ્થાને યોગી ન સંશયઃ ॥ ૪૪-૩૮॥

ઇતિ શ્રીરુદ્રયામલે ઉત્તરતન્ત્રે મહાતન્ત્રોદ્દીપને સિદ્ધમન્ત્રપ્રકરણે
ષટ્ચક્રપ્રકાશે મણિપૂરભેદને ભૈરવીભૈરવસંવાદે
ત્રિતત્ત્વલાકિનીશક્તિસ્તવનં નામ ચતુશ્ચત્ત્વારિંશત્તમઃ પટલઃ ॥ ૪૪॥

The numbers correspond to paTala and verse numbers from
Rudrayamala uttaratantra.

Proofread by Aruna Narayanan

*Tritattvalakini Stavanam*

pdf was typeset on February 16, 2020

Please send corrections to *sanskrit@cheerful.com*